श्रीगुरुस्तुतिः

श्रीवैष्णवैशगाणेश-सौर्यशाक्त्यादिरूपधृक्। दत्तात्रेयोऽस्त्वजोऽनन्तः सदा मे हृदि सद्गुरुः ।।१।।

योऽजोऽनन्तोऽगुणोऽरूपो निस्तृडेकोऽक्रियोऽसृजत् । विश्वं धृत्वा षोडशांशं पुंरूपं योगमायया ।।२।।

दृश्यते ज्ञानदृष्ट्या यत्सहस्राक्षिशिरोऽङ्घ्रि सत्। रूपं यदङ्गसंस्थानैर्लोकव्यासः प्रकल्प्यते ।।३।।

नानावतारबीजं यदनन्तं यत्कलामुखैः। देवतिर्यङ्मुखं सृष्टमस्वतन्त्रं जगत्पुरु ।।४।।

गोभिः स्वार्थादानमीश-सृष्टं नेशात्परं क्वचित्। देहेन्द्रियात्मजीवोत्थौ रागद्वेषावियन्तु भित् ।।५।।

भूतेट् सोऽजोऽव्ययात्मापि संभवत्यात्ममायया। श्रेयोऽर्हसाधुगुप्त्यै स्वप्रकृतिस्थो युगे युगे ।।६।।

श्रुत्वा तत्कर्म निर्द्वन्द्वो मुच्यते कर्मबन्धनात् । न तथा कर्मसिद्धीप्सुर्द्वन्द्वात्मा भ्रान्तहृन्नरः ।।७।।

गुणकर्मभिदा सृष्ट-चातुर्वर्ण्यस्य सोऽव्ययः। कर्ताप्यकर्ता यैर्ज्ञातो बध्यन्ते कर्मभिर्न ये ।।८।।

।।श्रीगणेशाय नमः।। श्रीसरस्वत्यै नमः।। श्रीगुरुभ्यो नमः।। अथ श्रीगुरुचरितं वक्तुं प्रथमं मंगलार्थं परःशतश्लोकैः श्रीगुरुः स्तौति श्रीति। अत्र **श्री**शब्दो देवतावाचकत्वान्मंगलार्थः। यदुक्तं देवतावाचकादिशब्दाः ये च भद्रादिवाचकाः।। सर्वे ते नैव निन्द्याः स्युर्लिपितो गणतोऽपि वा ' इति।। सांख्यप्रवचनेऽपि ' मंगलाचरणं शिष्टाचारात्फलदर्शनाच्छ्रुतितश्च। अत्र तावदभेदेन श्रीदत्तं स्तुवन् वस्तुनिर्देशात्मकं मंगलमाचरति।। विष्णोरिदं **वैष्णवं** तस्येदमित्यण् एवमन्यत्र। श्रीमन्ति ज्ञानैश्वर्याद्यतिशययुक्तानि च तानि रूपाणि **आदि**शब्दादैन्द्राग्नेयादीनि तानि स्वमायाशक्त्या धरतीति तथोक्तः।।१।। **निस्तृट्** निरिच्छः **षोडश अंशाः** कलाः एकादशेन्द्रियाणि पञ्चभूतानि च यस्मिन् त**त्पुंरूपं** पुरुषरूपं **योगमायया** शक्त्या दृश्यते योगिभिरिति शेषः।।२।। **सहस्र**शब्दोऽनंतवाची यस्य **रूपस्यांगसंस्थानै**रवयवैः पातालादिलोकविस्तारः कल्प्यते।।३।। अन्तो नाशो न विद्यते यस्य तत् **यत्कलामुखै**र्ब्रह्ममरीच्यादिभिः **देवतिर्यङ्मुखं** देवतिर्यगादिनानाभेदभिन्नं **पुरु** बहु अपरिमितमित्यर्थः।।४।। **गोभिः** इन्द्रियैः स्वस्वग्रहणमीश्वरेण सृष्टं तत्तु सर्वमधिष्ठानभूतादीश्वरा**त्परं क्वचिद**पि किमपि न विद्यते तथात्वेऽपि देहेन्द्रियादितादात्म्याभिमानापन्नेन जीवेन सृष्टौ **रागद्वेषौ इयन्तु भित्** भेदः जीवसृष्टिरीशसृष्टिरिति ज्ञापको भेद इत्यर्थः। यया भिदा जीवोऽहं कर्ता भोक्ता सुखी दुःखीत्यादि स्वमात्मानं सच्चिदानन्दैकरसं विस्मृत्य विरुद्धं मनुते।।५।। **स भूतेट्** भूतानामीश्वरः मोक्षयोग्यसाधुसंरक्षणाय।।६।। **तत्कर्म** भक्तानुग्रहलक्षणं चरितं निष्कामतया **श्रुत्वा कर्मबन्धना**त्साधुर्यथा मुक्तो भवति तथा कर्मसिद्ध्यभिलाषी **भ्रान्त**चित्तः श्रवणपराङ्मुखोऽसाधुः न विमुच्यते।।७।। सत्त्वादि**गुणभेदे**न शमादि**कर्मभेदे**न च **सृष्टस्य चातुर्वर्ण्यस्य कर्ता**ऽपि **स** ईश्वरोऽसङ्गोदासीनत्वे**नाकर्ते**ति यैर्ज्ञातोऽतएव स्वयमपि **कर्मभिः** स्वनुष्ठितै**र्ये न बध्यन्ते।**।८।। **भूभारभूता**स्तेषां **द्वेष्या** असाधवस्तेषां विनाशाय **तनू**रवतारान् यथा पदलग्नकण्टकोऽन्येन कण्टकेन निष्कास्यते तद्वत्स्वावताररूपकण्टकेन

भूभारभूतद्द्वेष्य-घाताय विविधास्तनूः। धृत्वा कण्टकवन्मत्वा कृतकार्यो जहात्यसौ ।।९।।
अस्यैवापूर्णकृत्याः स्युस्तन्वस्तासूत्तमोत्तमा। तनुरेकास्ति दत्ताख्या कृपासूः स्मर्तृगामिनी ।।१०।।
मुक्तैर्मुमुक्षिभिश्चान्यैर्ध्येया नान्येदृशी कलौ। कामदा यस्य कस्यापि स्मृतिगामिन्यनुक्षणम् ।।११।।
विश्वं ततान योऽव्यक्तस्तद्यत्स्थं यो न तत्स्थितः। तद्यत्स्थं नैश्वराद्योगात्तद्भृत्तत्स्थो न वायुवत् ।।१२।।
मावशाद्योऽवशोऽभीक्ष्णं व्यसृजत्तदबंधनः। येनाध्यक्षेण मा सूते जगद्वेदामलं न यम् ।।१३।।
नृरूपेणावतीर्णं यत्तत्त्वाज्ञोऽसुरभावगः। न वेत्ति योगगम्यं यं सद्धर्मत्राणकारणम् ।।१४।।
सोऽन्वर्थाख्यानसूयात्रिपुत्रो जज्ञेऽज ईश्वरः। अचिन्त्याव्यक्तरूपोऽपि दत्तोऽर्च्यः स्मृतितोषणः ।।१५।।
परानन्दमयो विष्णुर्हृत्स्थोऽवेद्योऽप्यतीन्द्रियः। सदा सम्पूज्यते भक्तैर्भगवान् भक्तिभावनः ।।१६।।
अचिन्त्यस्य कुतो ध्यानं कूटस्थावाहनं कुतः। क्वासनं विश्वसंस्थस्य पाद्यं पूतात्मनः कुतः ।।१७।।
क्वानर्घोरुक्रमस्यार्घ्यं विष्णोराचमनं कुतः। निर्मलस्य कुतः स्नानं क्व निरावरणेऽम्बरम् ।।१८।।
स्वसूत्रस्य कुतः सूत्रं निर्मलस्य च लेपनम्। निस्तृषः सुमनोभिः किं किमक्लेद्यस्य धूपतः ।।१९।।

निष्कास्यान्ते तमवताररूपं कण्टकवन्मत्वा **कृतकार्यः** सन् **जहाति** द्वयोस्तुल्यत्वात् ।।९।। तर्हि नरनारायणनारदसनकाद्याः कुतोऽवशिष्टाः कार्यशेषत्वादित्याह - **अस्ये**श्वरस्यावतारा अद्या**प्यपूर्णकृत्याः** श्रीदत्तनरनारायणसनत्कुमारादयः **तासूत्तमोत्तमा** कृपां सूत इति **कृपासूः** सत्सूद्विषेत्यादिना क्विप्। दयाजननी।।१० **अन्यैर्**विषयिभिः **ईदृशी** स्मर्तृगामिनी शीघ्रफलदा च।।११।। **यो** ज्ञानैश्वर्यतेजोबलवीर्यात्मकः **अव्यक्तः** परोक्षत्वात् न प्रधानं पुंस्त्वादेशात् **तद्**विश्वं यस्मिन्नीश्वरे तिष्ठतीति तथापि **य** ईश्वरो न तस्मिन् विश्वस्मिन्स्थितः। यदुक्तं पूर्वाचार्यैः '*मायाध्यासाश्रयेण प्रविततमखिलं यन्मया तेन मत्स्थान्येतान्येतेषु नाहं यदपि हि रजतं भाति शुक्तौ न रौप्ये।। शुक्त्यंशस्तेन भूतान्यपि मयि निवसन्तीति विश्वग्विनेता प्राह* ' इति।।१२।। **मा** माया **व्यसृजद्**विविधमसृजत् तद्बंधरहितः।।१३।। **योगगम्य**त्वाद्यस्य भगवतस्तत्त्वमविद्वानासुरीसम्पत्समन्वितो **नृरूपेणावतीर्णं** मलनिवर्तकमपि **सद्धर्मत्राणकारणमपि यं** भगवंतं न वेद।।१४।। **स** सार्थकनाम्नोरनसूयात्र्योः **पुत्रो जज्ञे** स्मरणमात्रसंतुष्टः।।१५।। **हृत्स्थो** हृदयस्थोऽपि **अतीन्द्रिय**त्वात् वृत्तिव्याप्तिं विना**ऽवेद्यः** तथा स **भक्तिभावनो भक्तैः** सम्यक्पूज्यते भावनयेति शेषः।।१६।। भावनैव कारणं दर्शयितुमाह **कूटस्थ** एकरूपतया कालव्यापी।।१७।। अमूल्या **उर**वः **क्रमाः** पादविक्षेपा यस्य **विष्णोर्**व्यापनशीलस्य **निरावरणे** विक्षेपावरणरहिते**ऽम्बरं** वस्त्रं।।१८।। **स्वसूत्रस्य** स्वतन्त्रस्य। **निस्तृषो**ऽनिच्छस्य अमूर्तत्वा**दक्लेद्यस्य**।।१९।।

स्वप्रकाशस्य दीपैः किं किं भक्ष्याद्यैर्जगद्भृतः। किं देयं परितृप्तस्य विराजः क्व प्रदक्षिणाः ।।२०।।
किमनन्तस्य नतिभिः स्तौति को वागगोचरम्। अन्तर्बहिःप्रपूर्णस्य कथमुद्वासनं भवेत् ।।२१।।
सर्वतोऽपीत्यसंभाव्यो भाव्यते भक्तिभावनः। सेव्यसेवकभावेन भक्तैर्लीलानृविग्रहः ।।२२।।
तवेशातीन्द्रियस्यापि पारम्पर्याश्रुतां तनुम्। प्रकल्प्याश्मादावर्चन्ति प्रार्चयेऽर्चां मनोमयीम् ।।२३।।
कलसुश्लोकगीतेन भगवन्दत्त जागृहि। भक्तवत्सल सामीप्यं कुरु मे मानसार्चने ।।२४।।
श्रीदत्तं खेचरीमुद्रा-मुद्रितं योगिसद्गुरुम्। सिद्धासनस्थं ध्यायेऽभी-वरप्रदकरं हरिम् ।।२५।।
दत्तात्रेयाह्वयाम्यत्र परिवारैः सहार्चने। श्रद्धाभक्त्येश्वरागच्छ ध्यातधाम्नाञ्जसा विभो ।।२६।।
सौवर्णं रत्नजडितं कल्पितं देवतामयम्। रम्यं सिंहासनं दत्त तत्रोपविश यंत्रिते ।।२७।।
पाद्यं चंदनकर्पूर-सुरभि स्वादु वारि ते। गृहाण कल्पितं तेन दत्ताङ्घ्री क्षालयामि ते ।।२८।।
गन्धाब्जतुलसीबिल्व-शमीपत्राक्षतान्वितम्। साम्ब्वर्घ्यं स्वर्णपात्रेण कल्पितं दत्त गृह्यताम् ।।२९।।
सुस्वाद्वाचमनीयाम्बु हैमपात्रेण कल्पितम्। तुभ्यमाचम्यतां दत्त मधुपर्कं गृहाण च ।।३०।।
पुष्पवासितसत्तैलमंगेष्वालिप्य दत्त भोः। पंचामृतैश्च गांगाद्भिः स्नानं ते कल्पयाम्यहम् ।।३१।।
भक्त्या दिगंबराचान्तजलेदं दत्त कल्पितम्। काषायपरिधानं तद् गृहाणैणेयचर्म च ।।३२।।
नानासूत्रधरैते ते ब्रह्मसूत्रे प्रकल्पिते। गृहाण दैवतमये श्रीदत्त नवतन्तुके ।।३३।।

जगद्भृतो जगत्पोषकस्य **विराजः** समष्टिरूपेणावस्थितस्य।।२०।। **नतिभिः** नमस्कारैः **उद्वासनं** विसर्जनं।।२०।। इत्युक्तप्रकारेण **सर्वतोऽसंभाव्योऽपि** लीलया गृहीतनरदेहो **भाव्यते** कल्पितोपचारैः पूज्यते।।२२।। पाषाणादौ गुरुपारम्पर्यतः श्रुतां प्रतिमारूपां तनुं **प्रकल्प्य** स्वबुद्ध्योऽ**र्चन्ति** अहन्तु ध्यानयोगार्थं अष्टविधप्रतिमासूत्तमां **मनोमयीमर्चां** प्रतिमां क्षिप्रैकाग्र्यार्थं प्रकर्षेणा**र्चये** पूजये।।२३।। **कला** मनोहराः शोभनाः **श्लोकाः** यशांसि यस्मिंस्तेन **गीतेन**।।२४।। लम्बिकोर्ध्वगामिन्या समनस्कया जिह्वया **मुद्रितं**। **सिद्धासनं** गुदमेढ्रोर्ध्वगुल्फस्थापनारूपं। अभय**वरप्रदौ करौ** यस्य।।२५।। **अञ्जसा** शीघ्रम् ।।२६।। पीठदेवतामयं **यन्त्रिते** यन्त्रयुक्तेऽत्रासने।।२७।।२८।। **साम्बु** जलसहितं।।२९।।३०।। **गाङ्गाद्भिर्**गङ्गोदकैः।।३१।। आचान्तं जलं येन सः भो **आचांन्तजल** कृताचमन। एणीमृगस्येद**मैणीयं**।।३२।।३३।।

भूतिमृत्स्नासुकस्तूरी-केशरान्वितचंदनम्। रत्नाक्षताः कल्पितास्त्वामलङ्कुर्वेऽथ दत्त तैः ।।३४।।

सच्छमीबिल्वतुलसी-पत्रैः सौगंधिकैः सुमैः। मनसा कल्पितैर्नानाविधैर्दत्तार्चयाम्यहम् ।।३५।।

लाक्षासिताभ्रश्रीवास-श्रीखण्डागरुगुग्गुलैः। युक्तोऽग्नियोजितो धूपो हृदा स्वीकुरु दत्त तम् ।।३६।।

स्वर्णपात्रे गोघृताक्त-वर्तिप्रज्वालितं हृदा। दीपं दत्त सकर्पूरं गृहाण स्वप्रकाशक ।।३७।।

सषड्रसं षड्विधान्नं नैवेद्यं गव्यसंयुतम्। कल्पितं हैमपात्रे ते भुंक्ष्व दत्तांब्वदः पिब ।।३८।।

प्रक्षाल्यास्यं करौ चाद्भिर्दत्ताचम्य प्रगृह्यताम्। तांबूलं दक्षिणां हैमीं कल्पितानि फलानि च ।।३९।।

नीराज्य रत्नदीपैस्त्वां प्रणम्य मनसा च ते। परितस्त्वत्कथोद्घातैः कुर्वे दत्त प्रदक्षिणाः ।।४०।।

मन्त्रवन्निहितो मूर्ध्नि दत्त ते कुसुमाञ्जलिः। कल्प्यन्ते मनसा गीत-वाद्यनृत्योपचारकाः ।।४१।।

प्रेर्यमाणप्रेरकेण त्वया दत्तेरितेन ते। कृतेयं मनसा पूजा श्रीमंस्तुष्टो भवानया ।।४२।।

(अपराधक्षमापनस्तोत्रम्)

दत्त मानसतल्पे मे सुखनिद्रां रहः कुरु। रम्ये व्यायतभक्त्यामतूलिकाढ्ये सुवीजिते ।।४३।।

रसज्ञावशा तारकं स्वादु लभ्यं गृहीतं कदाचिन्न ते नाम दत्त ।।

क्षमस्वापराधं क्षमस्वापराधं क्षमस्वापराधं प्रभो क्लिन्नचित्त ।।४४।।

भूतिर्भस्म **मृत्स्ना** प्रशस्तमृत्तिका सस्नौ प्रशंसायामिति पाणिनीयात्।।३४।। **सौगंन्धिकैः** कल्हारैः।।३५।। **सिताभ्रो** हिमवालुका **श्रीवासो** वृकधूपः। **अगुरुः** कालागुरुः।।३६।। भोः **स्वप्रकाशक** स्वयंज्योतिः।।३७।। *भक्ष्य*मपूपादि *भोज्यं* पायसादि *लेह्यं* गुडादि *चोक्ष्य*मिक्षुदंडादि *पेयं* पानकादि *चर्व्यं* चिपिटादि एवं **षड्विधं** मधुरादि**षड्रस**युक्तं **अद** इदमम्बु।।३८।। **हैमीं** स्वर्णमयीं।।३९।। **त्वत्कथोद्घातैः** त्वत्कथाभ्यागानैः।।४०।। **कुसुमाञ्जलिः** पुष्पाञ्जलिः। **मन्त्रवत्** समन्त्रकं यथा तथा।।४१।।अस्मादीनां **प्रेर्यमाणा**नां **प्रेरकेणा**ऽन्तर्यामिना **त्वयेरितेन**।।४२।। **रह** एकान्ते कामसङ्कल्पदिकोलाहलवर्जिते **रम्ये** मैत्र्यादिभावनया शोभमाने **व्यायतभक्ति**रूपा कोमला मृदुला **तूलिका** तया**ऽऽढ्ये** कल्पितवालादिव्यजनेन **सुवीजिते** असुभिः प्राणैर्वीजिते वा।।४३।। **इति मानसपूजा**।। अथ अपराधक्षमापनस्तुतिः भुजंगप्रयातवृत्तैरुच्यते।। **रसना** जिह्वा वशवर्तिनि। विद्यत इति शेषः। पूनर्भवन्नाम **स्वादु, लभ्यं** च न तु महार्घं। भोः **क्लिन्नचित्त** आर्द्रहृदय।।४४।।

वियोन्यन्तरे दैवदाढ्र्याद्विभो प्राग्, गृहीतं कदाचिन्न ते नाम दत्त ।।
क्षमस्वापराधं क्षमस्वापराधं क्षमस्वापराधं प्रभो क्लिन्नचित्त ।।४५।।
मया मातृगर्भस्थितिप्राप्तकष्टाद् गृहीतं कदाचिन्न ते नाम दत्त ।।
क्षमस्वापराधं क्षमस्वापराधं क्षमस्वापराधं प्रभो क्लिन्नचित्त ।।४६।।
मया जातमात्रेण संमोहितेन गृहीतं कदाचिन्न ते नाम दत्त ।।
क्षमस्वापराधं क्षमस्वापराधं क्षमस्वापराधं प्रभो क्लिन्नचित्त ।।४७।।
मया क्रूडनासक्तचित्तेन बाल्ये गृहीतं कदाचिन्न ते नाम दत्त ।।
क्षमस्वापराधं क्षमस्वापराधं क्षमस्वापराधं प्रभो क्लिन्नचित्त ।।४८।।
मया यौवनेऽज्ञानतो भोगतोषाद् गृहीतं कदाचिन्न ते नाम दत्त ।।
क्षमस्वापराधं क्षमस्वापराधं क्षमस्वापराधं प्रभो क्लिन्नचित्त ।।४९।।
मया स्थाविरेऽनिघ्नसर्वेन्द्रियेण गृहीतं कदाचिन्न ते नाम दत्त ।।
क्षमस्वापराधं क्षमस्वापराधं क्षमस्वापराधं प्रभो क्लिन्नचित्त ।।५०।।
हृषीकेश मे वाङ्मनःकायजातं हरेऽज्ञानतो ज्ञानतो विश्वसाक्षिन् ।।
क्षमस्वापराधं क्षमस्वापराधं क्षमस्वापराधं प्रभो क्लिन्नचित्त ।।५१।।
स्मृतो ध्यात आवाहितोऽस्यर्चितो वा न गीतः स्तुतो वन्दितो वा न जप्तः ।।
क्षमस्वापराधं क्षमस्वापराधं क्षमस्वापराधं प्रभो क्लिन्नचित्त ।।५२।।

अन्या विविधा योनयो योन्यन्तरं तस्मिन्।।४५।।४६।।४७।।४८।।४९।। **अनिघ्नानि** पराधीनानि **सर्वेन्द्रियाणि** यस्य तेन।।५०।।५१।। **न स्मृतो,** न **ध्यात** इति प्रत्येकं सम्बध्यते।।५२।।

दयाब्धिर्भवादृङ् न सागाश्च मादृग् भवत्याप्तमन्तोर्भवान्मे शरण्यः ।।
यथालम्बनं भूर्हि भूनिस्सृतांघ्रे-रिति प्रार्थितं दत्तशिष्येण सारम् ।।५३।।

दत्तं वन्दे दशातीतं दयाब्धिं दहनं दमम्। दक्षं दरघ्नं दस्युघ्नं दर्शं दर्पहरं दवम् ।।५४।।
दातारं दारुणं दांतं दास्यादं दानतोषणम्। दानं दावप्रियं दावं दासत्रं दारवर्जितम् ।।५५।।
दिक्पं दिवसपं दिक्स्थं दिव्ययोगं दिगम्बरम्। दिव्यं दिष्टं दिनं दिश्यं दिव्याङ्गं दितिजार्चितम्।।५६।।
दीनपं दीधितिं दीप्तं दीर्घं दीपं च दीप्तगुम्। दीनसेव्यं दीनबन्धुं दीक्षादं दीक्षितोत्तमम् ।।५७।।
दुर्ज्ञेयं दुर्ग्रहं दुर्गं दुर्गेशं दुःखभंजनम्। दुष्टघ्नं दुग्धपं दुःखं दुर्वासोऽग्र्यं दुरासदम् ।।५८।।
दूतं दूतप्रियं दूष्यं दूष्यत्रं दूरदर्शिपम्। दूरं दूरतमं दूर्वाभं दूराङ्गं च दूरगम् ।।५९।।
देवार्च्यं देवपं देवं देयज्ञं देवतोत्तमम्। देहज्ञं देहिनं देशं देशिकं देहिजीवनम् ।।६०।।
दैन्यं दैन्यहरं दैवं दैन्यदं दैविकांतकम्। दैत्यघ्नं दैवतं दैर्घ्यं दैवज्ञं दैहिकार्तिदम् ।।६१।।

यतो दयासागरो **भवादृङ्** न विद्यते **सागाः** सापराधश्च **मादृङ् न भवति** त्वयि जातापराधस्य **मे** त्वमेव **शरण्यः**। अर्थान्तरेण दृढयति **भुवि निःसृताङ्घ्रेः** स्खलितपादस्य **भू**र्भूमिरेवालम्बनं यथा तथा **हि**रेवार्थे **शिष्येण** शासनार्हेण इति सम्पूर्णम्।।५३।। अथाष्टोत्तरशतनामावलिः।। **दहन**मग्निरूपं एवमन्यत्राप्यूहं **दरघ्नं** भयहरं **दस्युघ्नं** चोरघ्नं पितृतृप्तये **दर्श**रूपं **दवो** वनं तद्रूपं ' वन्याय च ' इति श्रुतेः। इमान्यभिधानानि श्रीगुरोः सर्वात्मत्वबोधकानि।।५४।। पापिनां यमरूपेण **दारुणं दावप्रियं** वनप्रियं **दावं** वनाग्निरूपं **दानं** सात्त्विकदानरूपं **दासत्रं** दासपरिपालकं।।५५।। **दिक्पं** दिक्पालरूपं **दिवसपं** सूर्यरूपं **दिक्स्थं** दिग्गजरूपं **दिव्यं** दिवि भवं देवरूपं **दिष्टं** कालरूपं **दिश्यं** दिग्भवं दैत्यपूजितं च।।५६।। **दीनपं** दरिद्रपालकं **दीधितिं** किरणरूपं **दीप्तगुं** देदीप्यमानदृष्टिं प्रखरकिरणं वा मन्त्रादिदीक्षा ददातीति तं **दीक्षादं**।।५७।। ब्रह्मरूपत्वाद् **दुर्ज्ञेयं** ' गुहाहितं गह्वरेष्ठं ' इति श्रुतेः। **दुर्गं** गुहाहितं दुर्गा हैमवती तदीशः शिवस्तद्रूपः दुर्गपालकं वा।।५८।। अग्निरूपेण देव**दूतम् दूष्यं** वस्त्रवेश्मरूपं **दूष्यत्रं** पापितारकं **दूरदर्शिपं** पण्डितेशं **दूरतमं** बहिर्मुखानां कल्पकोटिभिरलभ्यत्वात्।।५९।। समयोचितदेयं जानाति तथा तं **देयज्ञं देहज्ञं** क्षेत्रज्ञं अवताराभिप्रायेण **देहिनं देशिक**मुपदेष्टारं सद्गुरुं।।६०।।**दैवं** प्राक्तनकर्मरूपं **दैन्यदं दैन्यहरं दैविकान्तकं** आधिदैविकादिदुःखहरं विष्णुरूपेण **दैत्यघ्नं दैहिकार्ति**हरं **दैवज्ञं** गणकरूपं।।६१।।

दोषघ्नं दोषदं दोषं दोषित्रं दोर्द्वयान्वितम्। दोषज्ञं दोहपं दोषेड्बन्धुं दोर्ज्ञं च दोहदम् ।।६२।।

दौरात्म्यघ्नं दौर्मनस्य-हरं दौर्भाग्यमोचनम्। दौष्ट्यत्रं दौष्कुल्यदोष-हरं दौर्हृद्यभञ्जनम् ।।६३।।

दण्डज्ञं दण्डिनं दण्डं दम्भघ्नं दम्भिशासनम्। दन्त्यास्यं दन्तुरं दंशि-घ्नं दण्ड्यज्ञं च दण्डदम् ।।६४।।

अनन्तानन्तनामानि सन्ति तेऽनन्तविक्रम। वेदोऽपि चकितो यत्र नुर्वाग्हृद्दूर का कथा ।।६५।।

(प्रार्थना)

नामरूपगुणातीत भेदसङ्गविवर्जित। एक एवाद्वितीयोऽसि परमात्मन् हि नाकवत् ।।६६।।

नामरूपगुणाभेदा मायासक्तिरनेकता। कल्पिता स्थूलधीभिस्ते महाकाशादिवद्विभो ।।६७।।

बहुरूपाप्रमेया ते मायैषा जगदीश्वर। मन्यते मेऽहमित्यस्या रममाणो गुणेष्वसौ ।।६८।।

कारणं त्विदमेवात्र जगद्विपरिवर्तने। येषां नाव्यक्त गम्योऽसि त्वमेव परमा गतिः ।।६९।।

आसत्यलोका लोकास्ते पुनरावर्तिनोऽक्षर । तस्मात्त एव धन्याः स्युर्गृहीतं धाम यैस्तु ते ।।७०।।

उन्निनीषया भक्तानां **दोषघ्नं** अधोनिनीषया पापिनां **दोषदं** प्राक्कर्मफलदानाय कफादि**दोष**रूपं **दोषिभ्यस्त्रा**यत इति तं सांसर्गिकपापहरं **दोर्द्वयान्वितं** द्विभुजान्वितं चन्द्रसोदरं **दोर्ज्ञं** भुजकोट्यादिज्ञं गवादि**दोहदं।।६२।। दौरात्म्यघ्नं** दुःस्वभावहरं दौष्ट्येभ्यस्त्रायत इति तं **दौष्ट्यत्रं**।।६३।। दण्डनीतिज्ञं **दण्डिनं** मस्करिणं **दम्भिशासिनं** दाम्भिकशास्तारं **दन्त्यास्यं** गणेशरूपं **दन्तुरं** करालं राक्षसादिरूपं **दंशिघ्नं** मक्षिकाबाधावारकं **दण्ड्यज्ञं** दण्डार्हाभिज्ञमिति।।६४।। **अनन्तविक्रम**त्वा**दनन्त**स्य **तेऽनन्तनामानि** यत्र नामसंख्याने **वेदोऽपि** शंकित हे **वाग्हृद्दूर** वाङ्मनसयोरगोचर तव नामसंख्याने **नुर्**नरस्य तु **का कथा** न काऽपि।।६५।। **नामरूपगुणातीत**सततोऽप्यधिकस्तत्संबुद्धौ त्रिविध**भेदै**र्माया**सङ्गे**न च **विवर्जित**स्तत्सम्बुद्धौ **नाकवदा**काशवत्त्वं **एक एवाद्वितीयोऽसि** परमात्मरूपत्वात्।।६६।। तथा **स्थूलबुद्धिभि**र्लौकिकैः सगुणनिष्ठैर्वा नामरूपगुणादयः यथैकस्यैवाकाशस्य **महाकाशा**भ्राकाशजलाकाशघटाकाशा उपाधिवशात्कल्प्यन्ते तथा हे **विभो ते** तवापीयं कल्पना न तात्त्विकी किन्तु कल्पितत्वाद्घटाकाशादिवदज्ञानविजृम्भिता किंवा शुद्धस्वरूपज्ञानार्थं शाखाचन्द्रवज्ज्ञानिभिः कल्पिताः 'विकल्पतदभावाभ्यामसंस्पृष्टात्मवस्तुनि। विकल्पित्वलक्ष्यत्वसम्बन्धाद्यास्तु कल्पिताः' इत्युक्तेः।।६७।। अंशभेदेन गुणभेदेन च **बहुरूपाऽप्रमेया** प्रमाणाविषया तथाऽ**प्येषा** कार्येणानुमेया **ते** तव **माया** सत्त्वासत्त्वाभ्यामनिर्वाच्या **अस्या गुणेषु** मायारचितदेहादिष्वध्यासेन **रममाणोऽसौ** पुरुषो ममा**हमिति मन्यते**।।६८।। **जगतो विपरिवर्तने**ऽभिमानरूपमि**दमेव कारणं** हे **अव्यक्त त्वमेव परमा गति**रिति **येषां न गम्योऽसि**।।६९।। यो यदात्मकः स तद्गतस्तदाश्रयश्च भवति इति वक्तुं युक्तं मृदाश्रय इव घटादिः अतएव परमां स्वगतिमविद्वांसो ये **ते लोका** 'आब्रह्मभुवनाल्लोका' इति स्मृतेः सत्यलोकोऽस्ति येषां तान्मर्यादीकृत्ये**त्यासत्यलोकाः।** आङ्मर्यादावचन इत्यव्ययीभावः। **ते लोकाः पुनरावर्तिनः।**

नानुमानेन ते धाम ग्रहीतुं शक्यते ह्यतः। मृग्योऽसि पुरुषेणैव बुद्ध्यादिगुणहेतुभिः ।।७१।।
पुंस्त्वेऽप्यर्क इवान्धानां गोकल्पानामतीन्द्रिय। स्वप्नेऽपि नैव ते वार्ता पुनः प्रत्यक्षता कुतः ।।७२।।
प्रेष्ठत्वद्भक्तसंयोग-विवेकामलदृष्टिभिः। साङ्ख्ययोगपरैर्धीरैः क्रमात्ते धाम गम्यते ।।७३।।
तस्माद्दत्तं नृजन्मेदं त्वया दिष्ट्याऽमृतक्षमम्। सद्दृष्टिदानाद्भगवंस्तत्साफल्यं कुरु प्रभो ।।७४।।

त्वत्प्रेमभक्त्यैव सदा मदात्मा धिया धियं दृष्टिमपीश दृष्ट्या ।
अंगैः सदाङ्गानि दृढं दयाब्धे हरे निबध्नात्विति मेस्ति याच्ञा ।।७५।।
पादौ त्वदीयालयतीर्थयात्राविहारिणावर्चनतत्परौ मे।
करौ रसज्ञापि भवत्वजस्रं सत्त्वत्कथोद्धातरसज्ञतोत्का ।।७६।।

ननु कौशीतकिब्राह्मणे पर्यङ्कविद्यायां ' तं पंचाशतान्यप्सरसां प्रधावन्ति शतं चामरहस्ताः शतं मालाहस्ताः शतमाञ्जनहस्ताः शतं वासोहस्ताः शतं फलहस्तास्तं ब्रह्मालङ्कारेणालङ्कुर्वन्ति ल ब्रह्मालङ्कारेणालङ्कृतो ब्रह्मविद् ब्रह्मैवाभिप्रैति ' इत्यादिना स्वाराज्यं प्राप्य ब्रह्मणा सह मुच्यते ' कार्यात्यये तदध्यक्षेण सहातः परमभिधानात् ' इति न्यायात्। ' वेदान्तविज्ञानसुनिश्चितार्था ' इति श्रुतेः ' ब्रह्मणा सह ते सर्वे सम्प्राप्ते प्रतिसञ्चरे। परस्यान्ते कृतात्मानः प्रविशन्ति परम्पदं ' इति स्मृतेश्च क्रममुक्तिश्रवणात् ' छायातपयोरिव ब्रह्मलोक ' इति काठके चेतरलोकापेक्षया ब्रह्मणो लोके छायातपयोरिवात्मानात्मनोः स्पष्टतरप्रतीतिरीदृशे ब्रह्मलोके क्रममुक्त्यर्हेऽपि तद्गतानामितरलोकगतानामिव कथं पुनरावृत्तिरुच्यत इति चेदुच्यते ब्रह्मलोको द्वेधा क्रममोक्षगामिलभ्यः कर्मिलभ्यश्च तयोः कर्मिण एव पुनरावृत्तिरिति विवेकः प्रकृष्टपुण्यकर्मवशाद् ब्रह्मलोकगतानामपि तत्र ज्ञानसाधनाभावात्पुण्योपभोगान्ते पुनरावृत्तिरत उक्तं पुनरावर्तिन इति ' साम्पराये तर्तव्यभावात्तथा ह्यन्य ' इति न्यायोऽत्रानुसन्धेयस्**तस्मादा**त्मभावेन **ते धाम** स्वरूपं **यैर्गृहीतं ते धन्या एव**।।७०।। **हि** यस्माद**नुमानेन ते धाम** स्वरूपं **गन्तुं** ज्ञातुं **न शक्यतेऽतः पुरुषेणैवा**प्रमत्तेन **बुद्ध्यादिगुणहेतुभिर्मृग्योऽसि** देहव्यतिरिक्तत्वंपदार्थशुद्धिमात्रस्यैवा**नुमानेन** विवक्षितत्वात्।।७१।। पुरुषत्वे**ऽपि** पशु**कल्पानां** नृणां **स्वप्नेऽपि** तव **वार्ता नैव पुनः कुतस्**तरां **प्रत्यक्षता** साकारब्रह्मनिष्ठताऽपि नैव लभ्या पुनर्मोक्षवार्ता तु दूरतोऽपास्तैवेति भावः। तस्य ज्ञानैकलभ्यत्वात् ' *नान्यः पन्था अयनाय विद्यत* ' इति श्रुतेः।।७२।। **प्रेष्ठः** प्रियतमः चासौ **त्वद्भक्त**श्च तस्य **संयोगः विवेको** विचारश्च तावेवा**मलदृष्टी येषां** तैः **सांख्यं** ज्ञानं **योगं** निष्कामकर्मानुष्ठानं तत्**परैर्**ब्रह्मचर्यादिसाधनसम्पन्नैः **क्रमाच्छ्र**वणमननादिक्रमेण **गम्यते**।।७३।। **अमृतक्षमं** निःश्रेयसहेतुभूतं ' पुरुषे त्वाविस्तरामात्मा ' इति श्रुतेः।।७४।। **त्वत्प्रेमभक्ति**द्वारेणैव मदीयस्वभावः **सदा** निरन्तरं तव मम च परस्परवियोगो माऽस्तु **इत्ये**वंरूपा **याच्ञा**।।७५।। इदं शरीरमपि त्वदुपयौगिकं भवत्विति प्रार्थ्यते पादावित्यादिना **त्वदीयालयानि** प्रासादाः काश्यादिक्षेत्राणि वा **तीर्था**नि पुष्करादीनि च तद्गमनशीलौ। **करौ** त्वत्पूजनतत्परौ। सत्यश्च तास्त्वत्**कथा**श्च तासां **उद्घातरसज्ञतोत्का** गीतानन्दस्वादज्ञतोत्कण्ठा च भवतु।।७६।।

त्वत्पादपद्मच्युतपुष्पगन्धं नासा भजत्वक्षियुगं गुणात्मन् ।
त्वन्मूर्तिमासेचनकां श्रुती मे श्राव्यास्त्वदीया भगवन्कथाश्च ।।७७।।
त्वदीयभक्ताङ्घ्र्यमलाब्जपूतां धूलिं मदङ्गानि सदा वहन्तु ।
मनस्तुरङ्गो निवसत्वजस्रं त्वय्येव दीपोऽङ्ग यथा निवाते ।।७८।।
शिरो नमत्वीश्वर तेऽङ्घ्रिपद्मं देहः सदाऽऽलिङ्गयतु त्वदर्चाम् ।
एषा त्वदीयैव तनुस्त्वमेव संबन्धिनो मे नहि केऽद्वितीय ।।७९।।
नूनं भवानृषिर्नैव न वर्णाश्रमलिङ्गभाक्। निर्मितं भवतैवेदं विश्वं स्वांशांशतोऽखिलम् ।।८०।।
न जानन्ति भवन्माया-मोहिता दिव्यमुत्तमम्। भवद्धामात एवैते भ्रमन्त्यसुरभावगाः ।।८१।।
कर्ता भर्तासि हर्ता त्वं प्रत्यक्षं तत्त्वमस्यपि। भो सर्वं खल्विदं ब्रह्म त्वमस्यात्मासि केवलम् ।।८२।।
त्वदुदेति रमत्येतद्विश्वं त्वय्येव लीयते। अष्टमूर्तिभिराभिस्त्वमाभासीव जगन्मयः ।।८३।।
दिक्पाला लोकपालाश्च श्रूयते दृश्यतेऽखिलम्। चराचरं जगल्लोका विष्णो तेऽवयवा अमी ।।८४।।

भो **गुणात्मन्**नाविष्कृतसगुणमूर्ते यद्दर्शनात्तृप्तेरन्तो नास्ति सा**सेचनका** तां **श्रुती** कर्णौ **श्राव्याः** हृद्याः।।७७।। म**दङ्गानि** शिरःप्रभृतीनि **मन** एव **तुरङ्गो**ऽश्वः परमानन्दरूपे **त्वय्येव** नितरां वसतु यथा **निवात**देशे इतस्ततश्चलनाभावाद्**दीपो** निश्चलो भवति तथा संकल्पप्रभवसकलसर्वकामत्यागपूर्वकं वैराग्याभ्यासेन च शनैः शनैरुपरतं चित्तं त्वय्येव नितरां वसतु धर्ममेघाख्यानिर्बीजसमाधिसिद्धिर्भवत्विति प्रार्थना।।७८।। **त्वदर्चां** त्वत्प्रतिमां **त्वमेव मे सम्बन्धिनो** पित्रादयो मित्राणि च भो **अद्वितीय** त्वत्तोऽन्ये **के**ऽपि मम सम्बन्धिनो न **हि** एवमात्मज्ञानयोग्यः कारणसम्बन्धोऽस्त्विति प्रार्थनाभावः।।७९।। ननु ऋषिपुत्रस्य मम कुतो न्वियं प्रार्थनेत्यत आह **नूनं** निश्चयेन **ऋषिपुत्रो**ऽत्रिपुत्रो न **वर्णाश्रमा**दि**लिङ्गभाग**पि न वर्णाश्रमादयो देहे मायया परिकल्पिता इत्युक्तेरात्मनस्तव तत्सम्बन्धाभावोऽसङ्गत्वात् 'असङ्गो न हि सज्जत' इति श्रुतेः। यो हि कूटस्थं प्रत्यक्स्वरूपं स्वात्मतयानुभवति स वर्णाश्रमलिङ्गभाङ् न भवति किमुत वक्तव्यं लीलाविष्कृतमूर्तेरपि परमात्मनो वर्णराहित्यं। **स्वांशो** ब्रह्मा त**स्यांशा** मरीच्यादयस्तद्द्वारेण **भवतैवा**भिन्ननिमित्तोपादनकेनेदं नामरूपात्मकं **विश्वं** निर्मितम्।।८०।। ईदृशं जगत्कारणं **भवद्धाम न जानन्त्यत एव भ्रमन्ति** संसरति।।८१।। सगुणरूपेन कर्त्रादिरूपोऽसि **त्वं तत्त्वमसि इदं** विवर्तरूपं जगत्**केवलमात्मा** परं **ब्रह्म**।।८२।। विश्वोद्भवादिकारणं त्वमेवेत्याह **त्वदि**ति **रमति** रमते '*यतो वा इमानि भूतानि*' इत्यादिश्रुतिभ्यः पृथिव्यादिभि**रष्टमूर्तिभिः**। **इव**शब्देन न तथात्वं(इति) सूचितं।।८३।। **दिक्पालाः** इन्द्रादयः **लोकपाला** ब्रह्मादयः **श्रूयते** श्रुत्या ज्ञाप्यते स्वर्गादि आमुष्मिकं प्रत्यक्षादिप्रमाणैः **दृश्यते चराचरं जगत् लोकाः** स्वरादयः पातालादयश्च हे **विष्णो** इमानि तवाङ्गानि विराड्रूपेणावस्थितत्वात्।।८४।।

निगूढतत्त्व ते ज्ञातं यत्किञ्चिल्लोकदुर्ग्रहम्। चेष्टितं ते प्रसादोऽयं प्राक्पुण्यैर्मय्युपस्थितः ।।८५।।

सुखमैन्द्रियकं क्वापि न कांक्षे ते पदाश्रितः। नाकादीन्न प्रशंसामि नैव निन्दामि नारकान् ।।८६।।

यथेच्छं क्वापि मां कर्म-योगात्स्थापय विश्वभृत्। मां यत्र क्वापि ते भक्तिर्न जहात्विति काङ्क्षितम् ।।८७।।

स्तुवन्तु निन्दत्वपि ताडयन्तु मां पूजयन्त्वत्र जना न वापि ।
देहः पतत्वद्य युगान्तरे वा न किञ्चिदिष्टं न च मेऽप्यनिष्टम् ।।८८।।

हृद्धयात्मेन्द्रियवाक्कायैः सदा प्रकृतिभावतः। यद्यत्करोम्यर्पयामि परात्मन्दत्त सर्व ते ।।८९।।

लीलात्मना योऽत्रिगृहेवतीर्णो दत्ताख्य उन्मत्तपिशाचवद्यः ।
बालो युवा क्वापि जरन्जटाभृत् क्वचिद्दृषिर्व्यक्तपरीक्षितश्च ।।९०।।

त्यागी सुभोगी क्वचिदस्ति संगी योगी सुवासाः क्वचिदस्ति नग्नः ।
तुष्टः कृशः पुष्ट इह क्वचिद्यो दंडी च भिक्षुः क्वचिदस्ति वर्णी ।।९१।।

गृही वनी वर्णविरुद्धचेष्टः क्वचिच्च वर्णाश्रमधर्मयुक्तः ।
इत्यादयो यस्य विचित्रचेष्टा देवर्षिहृद्वागयनं व्यतीताः ।।९२।।

गुहाहितत्वान्निगूढं तत्त्वं यस्य तत्सम्बुद्धौ **लोकदुर्ग्रहं** तव **चेष्टितं यत्किञ्चिज्ज्ञातं अयं** तव **प्रसादः उपस्थितः** प्राप्तः।।८५।। इतः परं त्वत्**पदाश्रितः** सन् **क्वाऽपि** स्वर्गे नरकेऽपि विषयसुखं **न काङ्क्षे** कर्मफलस्यावश्यंभावित्वात् कदाचित्पुण्यातिशयेन प्राप्तान्स्वर्गादीन् **न प्रशंसामि नारकांश्च नैव निन्दामि**।।८६।। हे **विश्वभृत् क्वाऽपि** स्वर्गे नरके मर्त्यलोके वा तव प्रेमलक्षणा **भक्तिर्यत्र क्वाऽपि** स्थितं **मां न जहातु** इति मया **काङ्क्षितम्**।।८७।। **न वा पूजयन्तु** सुखादि किमपी**ष्टं न मे** दुःखाद्य**निष्टम**पि **न**।।८८।।**हृन्**मनः **धी**र्बुद्धिः **आत्मा**ऽहंकारः **इन्द्रियाणि** दश पुनर्**वाग्**ग्रहणं विशिष्टवाचिककर्मज्ञापनार्थं **कायो** देहश्च तैः **प्रकृति**स्व**भावतः** लौकिकमपि **यद्यत्करोमि** कर्म त**त्ते** तुभ्यं समर्पयामि।।८९।। **लीलात्मना** लीलाविग्रहेण भक्तपरीक्षार्थमु**न्मत्तपिशाचवत्** न तु तथा अलुप्तज्ञानैश्वर्यात् **जरन्**वृद्धः **क्वचिद्व्यक्तः** क्वचिल्लोकैः **परीक्षितश्च**।।९०।। **त्यागी** निष्कामकर्मानुष्ठाता **क्वचिदि**ति सर्वत्र सम्बध्यते **दण्डी** दण्डधरो मस्करी वा **भिक्षुर्**दण्डरहितः परमहंसः **वर्णी** ब्रह्मचारी।।९१।। **गृही** गृहस्थः **सुभोगी**ति पूर्वमुक्त्वाप्याश्रमाचारवत्त्वं पुनर्गृहीशब्देन ज्ञापितम् **वनी**वानप्रस्थः **वर्णविरुद्धचेष्टो**ऽत्याश्रमस्थः ईदृशो दृष्टोऽपि पुनः **क्वचिद्वर्णाश्रमधर्मयुक्त इत्यादयो यस्य विचित्रचेष्टा** अद्भुतलीलाः यास्ता **देवर्षी**णां **हृन्**मनो **वा**ग्वाणी तयोः पन्थानं विशेषेणातीताः पुनर्मनुष्याणां हृद्वाङ्मार्गमतीता इति किमु वक्तव्यं।।९२।।

यो भक्तरक्षाक्षण एव यस्य वै सेवा स्मृतिर्भोज्यनिवेदनं धिया ।
पूजाफलं योऽर्पयतीह दुर्लभं भक्तस्मृतौ संनिधिकृत्क्षणे क्षणे ।।९३।।

यस्यास्ति माहुरे निद्रा निवासः सह्यपर्वते। भागीरथ्यां सदा स्नानं ध्यानं गन्धर्वपत्तने ।।९४।।

कुरुक्षेत्रे चाचमनं धूतपापेश्वरे तथा। विभूतिधारणं संध्या करहाटे श्रियः पुरे ।।९५।।

भिक्षा विठ्ठलपुर्यस्य सुगन्धिद्रव्यधारणम्। भुक्तिः सारपुरे सायं-संध्या पश्चिमसागरे ।।९६।।

स एष भगवान्दत्तः सदा वसतु मे हृदि। हृद्धीन्द्रियादिव्यापारे सदा तत्स्मृतिरस्तु मे ।।९७।।

पादादि मूर्धपर्यन्तमेतद्वै भौतिकं वपुः। परिरक्षतु विश्वात्मा सदा सर्वत्र सर्वतः ।।९८।।

अपाणिपादो जवनो ग्रहीता पश्यत्यदृग्योपि शृणोत्यकर्णः ।
यो वेत्ति वेद्यं न हि यस्य वेत्ता सोऽग्र्यः प्रधानः पुरुषो हि दत्तः ।।९९।।

आधारभूतः स्थिरजङ्गमानां क्षमास्वरूपस्थितिरस्ति नित्यम् ।
आप्यायते यो जगदप्स्वरूपी सर्वाघहृत्स्थास्नुचरिष्णु जीवः ।।१००।।

स्व**भक्तरक्षा**यां **क्षणः** उत्सवः यस्य स **यस्य स्मृतिः** स्मरणमेव **सेवा** यत्स्व**भोज्य**स्य **निवेदनं** भक्त्या तस्मै समर्पणं सैव **पूजा** ईदृश्या भक्त्या भावितो भक्तेभ्यस्तपआदिभि**र्दुर्लभं फलं यच्छति** प्रयच्छति।।९३।।९४।। **धूतपापेश्वरे** हिमाद्रिपादे **विभूतिधारणं**।।९५।। **श्रियः पुरे** करवीरे **सारपुरे** पाञ्चालेश्वरे भोजनं।।९६।। **हृन्**मनः **आदि**शब्देन देहः **तत्स्मृतिः** तस्य श्रीदत्तस्य **स्मृतिः** स्मरणं।।९७।। पाञ्च**भौतिक** स्थूलं सूक्ष्मं च शरीरं तयोर्भौतिकत्वात् कवचमिदं।।९८।। **अपाणिर्ग्रहीता**ऽऽदानकर्ता **अपादो**ऽपि **जवनो** गन्ता नात्र पाठक्रमः किन्तु श्रुतिवदर्थक्रमः पाठक्रमादर्थक्रमस्य बलीयत्वादत्र पठितस्यापि तदनन्तरं सङ्गतिरवगन्तव्या यथान्येषां दाहकोऽप्यग्निः स्वात्मानं न दहति तद्वदयं **वेद्यं वेत्ति** स्वमात्मानमियन्मानोऽहमिति न वेत्ति तस्य सर्वज्ञस्य कोऽन्यो **वेत्ता न** तर्हि सर्वज्ञत्वभङ्ग इति चेन्न न हि शशविषाणाज्ञानं सर्वज्ञत्वं हन्ति **अग्र्य** आदिः **प्रधानः** श्रेष्ठः **पुरुषो**ऽन्तर्यामी।।९९।। अस्याष्टमूर्तित्वमाह **क्षमा** पृथ्वी **अप्स्वरूपी** सन् **सर्वा**णि च तानि कायिकादी**न्यघानि** पापानि सर्वेषामघं वा हरतीति तथा **स्थास्नु** स्थिरतरं वृक्षादि **चरिष्णु** चरणशीलं जङ्गमं तयोर्**जीव**भूत आत्मा।।१००।।

वैश्वानरात्माखिलदेहसंस्थः पचत्यसौ प्राणसखः सदान्नम् ।
यो भास्वदात्माखिलकर्मसाक्षी विश्वं सदा चेतयते स्वभासा ।।१०१।।
योऽब्जो रसात्मा सकलौषधीर्वै पुष्णाति संतापहरोऽखिलेड्यः ।
क्षेत्रेषु भूत्वा दशधाखिलेषु प्राणात्मको यः पवतेऽखिलात्मा ।।१०२।।
आकाशरूपोऽखिलगोऽपि सौक्ष्म्याद्योऽभेदसङ्गः किल शब्दसंस्थः ।
भुनक्ति चोत्क्रामति तिष्ठतेऽपि मूढा विदुर्यं न सदात्मरूपं ।।१०३।।
यः सर्वहृत्स्थोऽस्य यतः स्मृतिर्विद् वेदान्तकृद्योऽपि च वेदवेद्यः ।
समौ यदंशौ सयुजौ सुपर्णौ वृक्षाश्रितौ भुक्त्यवलोकनोत्कौ ।।१०४।।
स त्वं परात्मा पुरुषोत्तम श्रुति-ख्यातः समाविश्य जगत्त्रयं सदा ।
ईशाव्ययानन्त बिभर्षि दत्त ते पादाब्जयुग्माय नमोऽस्तु सर्वदा ।।१०५।।

वैश्वानरो जठराग्नि**रात्मा** स्वरूपं यस्य त्रिकोणत्वेन नृदेहे चतुष्कोणत्वेन पशुषु वर्तुलत्वेन पक्षिषु दीर्घत्वेन मत्स्यादिषु च **देहसंस्थो**ऽपानसहित**प्राणः सखा** यस्य सः प्राणापानयोरुद्दीपकत्वात् ' *ऊर्ध्वमग्नेर्जलं कृत्वाऽन्नं च कृत्वा जलोपरि।। अग्नेश्चाधः स्वयं प्राणः स्थित्वाग्निं धमते शनैः* ' इत्याद्युक्तत्वात् ' *प्राणापानसमायुक्तः पचाम्यन्नं चतुर्विधम्* ' इति स्मृतेश्च **भास्वदात्मा** सूर्यरूपी प्रकाशयति।।१।। **अब्जश्**चन्द्रः व्रीह्या**द्यौषधीः** संवर्धयति **अखिलेड्यः** सर्वस्तुत्यः **तापहरत्वात्** ईड्यत्वं सर्वस्थापि **क्षेत्रेषु** देहेषु प्राणापानसमानव्यानोदाननागकूर्मकृकरदेवदत्तधनञ्जयाः एवं **दशधा** सूत्रत्वेनावस्थितत्वाद्वाऽखिलात्मा ' *वायुर्वै गौतम तत्सूत्रम्* ' इति श्रुतेः।।२।। सूक्ष्मत्वाद्**भेदसंग**रहितः **शब्दसंस्थः** आकाशस्य शब्दगुणत्वात्।। **आत्मरूपं** जीवरूपं देहान्तरं गच्छन्तं।।३।। **हृत्स्थो**ऽन्तर्यामिरूपेणाविष्ट इव प्राणिमात्रस्य पूर्वानुभूतस्मरणं **स्मृतिः** विषयेन्द्रियसंयोगजज्ञानं **वित् वेदान्तकृत्**साम्प्रदायप्रवर्तको ज्ञानप्रदो गुरुः वेदैः सर्वैस्तत्तद्देवतारूपेण **वेद्य** उपनिषद्भागरूपवेदवेद्यो वा ' *तं त्वौपनिषदं पुरुषं पृच्छामि* ' इति श्रुतेः **समौ** समानस्वभावौ **यदंशौ** जीवेश्वरौ **सयुजौ** सखायौ सुष्ठु **पर्णं** गतिः सहायं वा ययोस्तौ। पर्णं गतौ सहाये चेति विश्वः। ओव्रश्चू छेदन इति धातोर्व्रश्चना**द्वृक्षो** देहोऽसङ्गशस्त्रेण छेद्यमानत्वात् तमा**श्रितौ**। **भुक्तिः** कर्मफलभोगः **अवलोकनं** साक्षित्वेन तद्दर्शनं जीवः कर्मफलभोगोत्कण्ठः ईशस्तु साक्षित्वेनावलोकनोत्कण्ठः अत्र श्रुती' *ऊर्ध्वमूलोवाक्शाख०* ' ' *द्वाऽसुपर्णा सयुजा०* ' ।।४।। ईदृशो यो **स त्वं परात्मा**ऽचेतनात्क्षराद्विलक्षणश्चेतनादक्षरान्नियन्तृत्वेन चोत्तमः अत एव **पुरुषोत्तमः** ' *स वा अयमात्मा सर्वस्य वशी सर्वस्येशानः सर्वस्याधिपति सर्वमिदं* प्रव्हीभावोऽस्तु।।५।।

(ध्यानम्)

वज्राङ्कुशध्वजाब्जाङ्क-युग्रक्ताब्जाभपत्तलः। गूढगुल्फः कूर्मपृष्ठोल्लसत्पादोपरिस्थलः ।।१०६।।
जानुपूर्वकजङ्घश्च विशालजघनस्थलः। पृथुश्रोणिश्च काकुत्स्थश्चारुनाभिर्दलोदरः ।।१०७।।
अररोरा मांसलांसो युगव्यायतबाहुकः। सुचिह्नचिह्नितकरः कम्बुकण्ठः स्मिताननः ।।१०८।।
स्नैग्ध्यधावल्ययुक्ताक्षश्चलत्-पिङ्गजटाधरः। चन्द्रकान्तिः प्रभुः कृष्ण-भ्रूरःश्मश्रुकनीनिकः ।।१०९।।
भावशुद्धद्विजाकीर्ण-स्वास्याब्जोऽभीवरप्रदः। दत्तात्रेयः स भगवान्सदा वसतु मे हृदि ।।११०।।
कलौ द्विराविरासीत्स दीनान्त्रातुं जनान्कलौ। सद्धर्मगुप्त्यै श्रीपाद-नरहर्यभिधानतः ।।१११।।
उड्ड्डीयन्ते यथाशक्ति यथोच्चावचपक्षिणः। अनन्तेऽनन्तलीलां तन्न्यायाद्वक्ष्ये यथामति ।।११२।।

।। इति श्रीगुरुचरिते श्रीगुरुस्तुतिः ।।

अथ ध्यानम्।। **वज्रा**दिचिह्नैर्युक्ते **रक्त**कम**लाभे** पादे यस्य **गूढा**वदृश्यौ **गुल्फौ** यस्य **कूर्मपृष्ठ**मि**वोल्लस**त्पादयोरुपरि स्थलं यस्य सः।।६।। **जानु**नः **पूर्व**भागे लीलया स्थापिता एका **जङ्घा** येन सः **विशालं** पृथुलं **जघनस्थलं** यस्य **पृथ्वी श्रोणिः** कटिपश्चाद्भागो यस्य स ककुदि तिष्ठतीति सोऽवयवविशेषयुक्तः **चार्वी** गम्भीरावर्तव**न्नाभि**र्यस्य जाड्यादिरहितं **दल**वत्पर्णव**दुदरं** यस्य सः।।७।। **अरर**मिव कपाटमिव विशाल**मुरः**स्थलं यस्य सः **मांसलौ** बलिष्ठौ बाहू यस्य **युग**वद्विशेषेणा**यतौ** बाहू यस्य स्वार्थे कन् एतेन लम्बत्वं उक्तं शोभन**चिह्नै**र्लक्षितौ करौ यस्य **कम्बु**वत्त्रिवलीयु**क्कण्ठो** यस्य ईषद्धास्ययुक्त**माननं** मुखं यस्य।।८।। स्निग्धगुणविशिष्टे धवले नेत्रे यस्य चलन्त्यः पिङगलवर्णाः **जटा**स्तासां **धरः** धारकः **चन्द्र**स्य **कान्ति**रिव कान्तिर्यस्य **भ्रु**कुटिरुरःस्थलं **श्मश्रु**णी प्रसिद्धे अक्ष्णोः **कनीनिके** चैतानि **कृष्णा**नि यस्य।।९।। स्वभावनिर्मलदन्ताकीर्णं शोभनमास्यकमलं यस्य **अभीः** अभयं '*वामहस्तेन वरदो दक्षिणेनाभयप्रदः*' **तिष्ठतु** गतिनिवृत्तिं करोत्वित्यर्थः।।१०।। **द्विर्**द्विवारं **आविरासीत्**प्रादुर्बभूव **सन्तः** साधवः **धर्मः** श्रुतिस्मृतिपुराणमूलश्चैषां **गुप्त्यै** संरक्षणाय।।११।। **उच्चावचपक्षिणो** नैकभेदाः शलभाद्या गरुडान्ताः **अनन्ते** आकाशे **अनन्तलीलां** भगवत्कथां।।१२।।